# संस्कृतवार्ता:

**दिनाङ्क : 03/01/2025** **सायम् - 06:20**

**मुख्यवार्ता:**

- प्रधानमन्त्री नरेन्द्रमोदी अद्य राजधान्यां नवदिल्ल्यां विविध-विकास-परियोजनानां लोकार्पणं शिलान्यासं च अकरोत्।
- राष्ट्रपतिः द्रौपदी मुर्मुः अद्य बेंगलुरु-नगरे निमहांस इति राष्ट्रिय-मानसिक-स्वास्थ्य- तन्त्रिका-विज्ञान-संस्थान-संस्थानस्य स्वर्ण-जयन्ती समारोहे मुख्यातिथित्वेन उपस्थिता।
- केन्द्रीयः रेल-सूचना-प्रसारणम् अथ इलेक्ट्रॉनिक्स-सूचना-प्रौद्योगिकी-मन्त्री अश्विनी वैष्णवः अद्य असमस्य गौहाट्याम् नैकासां परियोजनानां शुभारम्भम् अकरोत्।
- देशस्य उत्तरभागे प्रबल-कुज्झटिका-कारणेन दृश्यतायां नैयून्यकारणेन नैकेषां विमानानां रेलयानानां च गमनागमनं प्रभावितम्।
- **अपि च,** भारत-ऑस्ट्रेलिया-दलयोः मध्ये अनुवर्तमानायाः क्रिकेट-शृङ्खलायाः पञ्चमान्तिम-स्पर्धायाम् अद्य प्रथमे दिने क्रीडावसानं यावत् ऑस्ट्रेलिया दलेन एकस्य क्रीडकस्य हानौ नव धावनाङ्काः अधिगताः।

**प्रधानमन्त्री-दिल्ली**

प्रधानमन्त्री नरेन्द्रमोदी अद्य राजधान्यां नवदिल्ल्यां विविध-विकास-परियोजनानां लोकार्पणं शिलान्यासं च अकरोत्। असौ दिल्ल्या: अशोक विहार-क्षेत्रे सप्तशतोत्तरैक-सहस्रं नवनिर्मित गृहाणाम् उद्घाटनं विधाय पात्रेभ्य: लाभार्थिभ्य: कुञ्जिका प्रदानं अकरोत्। अस्या: परियोजनाया: उद्देश्यं अनियमितावासेषु वास्तव्यानां जीवने सुखसम्पत् प्रदानं विद्यते। अत्रावसरे श्रीमोदिना दिल्लीनगरस्य द्वे पुनर्विकास-परियोजने अपि नारौजीनगरे लोकार्पिते। प्रधानमन्त्रिणा दिल्ल्या: द्वारकायां त्रिशत् कोटि रुप्यकै: निर्मितस्य केन्द्रीय-माध्यमिक-शिक्षा-बोर्ड इत्यस्य एकीकृत-कार्यालय-परिसरस्य दिल्ली विश्वविद्यालये च षड् शत कोटि रुप्यकै: तिस्र: परियोजना: आरब्धा:। प्रधानमन्त्रिणा दिल्ल्या: सूरजमल-विहारे पूर्व परिसरे अकादमिक-इति खण्डस्य द्वारकायां पश्चिम-परिसरे अपि अकादमिक इति खण्डस्य आधारशिले स्थापिते। सममेव श्रीमोदिना नजफगढस्य रोशनपुराया वीरसावरकर-महाविद्यालयस्य अपि आधारशिला स्थापिता। अनन्तरं जनान् सम्बोधयन् श्रीमोदी समेभ्य: नववर्षस्य शुभकामना: अपि प्रदत्तवान्। अनुमोक्तं यत् इदं वर्षं भारताय वैश्विक-मञ्चेषु नूनतोपलब्धिनां वर्षं भविष्यति।

प्रधानमन्त्रिणा उक्तं यत् प्रशासनस्य प्रयास: वर्तते यत् दिल्ल्या: छात्रेभ्य: दिल्ल्याम् एव भद्रतर शिक्षावसरा: उपलब्धा: स्यु:।

**राष्ट्रपतिः बेङ्गलुरु-नगरम्**

राष्ट्रपतिः द्रौपदी मुर्मुः अद्य बेंगलुरु-नगरे निमहांस इति राष्ट्रिय-मानसिक-स्वास्थ्य- तन्त्रिका-विज्ञान-संस्थान-संस्थानस्य स्वर्ण-जयन्ती समारोहे मुख्यातिथित्वेन उपस्थिता। अत्रावसरे राष्ट्रपतिः नूतन-मनोचिकित्सा-खण्डस्य केन्द्रीय-प्रयोगशाला-परिसरस्य छात्रावास-भवनस्य च उद्घाटनं कृतवती। राष्ट्रपतिना बेलगावी इत्यत्र अत्याधुनिकस्य-कर्क-रोग-चिकित्सालस्य अपि उद्घाटनं

कृतम्। अस्मिन् अवसरे राष्ट्रपतिः द्रौपदी-मुर्मुः अवोचत् यत् महिलाः प्रत्येकं क्षेत्रे अग्रे वर्धन्ते। सामाजिकोत्थाने च महत्त्वपूर्णां भूमिकां निभालयन्ति।

सममेव राष्ट्रपतिना मानसिक-स्वास्थ्य-तन्त्रिका-विज्ञानस्य क्षेत्रे प्रशंसनीय-कार्याय निमहंस इति संस्थानं वर्धापितम्।

केन्द्रीय-स्वास्थ्य-मन्त्री जे.पी.नड्डा वर्यः अपि आघातोचोपचाराय, आत्महत्यावरोधाय मादक-द्रव्य-सेवनेन च पीडित-जनानां सहायतार्थं निमहंस संस्थानस्य योगदानं श्लाघयत्।

**उपराष्ट्रतिः वेदान्तः**

उपराष्ट्रपतिः जगदीपधनखड़ः अवदत् यत् वैश्विकानुशासनं देशस्य प्राचीनज्ञानं वेदान्तदर्शनम् च अङ्गीकुर्वन्ति। सः अवदत् वेदान्तः दर्शनात् बहु परः अस्ति तथा च मानवचेतनायाः निदर्शनम् अस्ति। उपराष्ट्रपतिना अद्य नवदिल्ल्याः जवाहरलाल-नेहरू-विश्वविद्यालये सप्तविंशति-तमस्य अन्ताराष्ट्रिय-वेदान्तसम्मेलनस्य उद्घाटनस्य अध्यक्षता कृता। अस्मिन् अवसरे प्रवदन् श्रीधनखड़ः अवदत् यत् वेदान्तः देशस्य कालातीतनिधिः वेदानां सारः अथवा उपसंहारः च अस्तीति।

**अश्विनी वैष्णवः**

केन्द्रीयः रेल-सूचना-प्रसारणम् अथ इलेक्ट्रॉनिक्स-सूचना-प्रौद्योगिकी-मन्त्री अश्विनी वैष्णवः अद्य असमस्य गौहाट्याम् नैकासां परियोजनानां शुभारम्भम् अकरोत्। आभिः परियोजनाभिः असम-राज्ये सम्पर्कं समेधितुम् आधारभूत-संरचनायाः विकासं च वर्धितुं साहाय्यं भविष्यति। असौ गुवाहाटी रेल-स्थासनात् गुवाहाटी-न्यू लखीमपुर जनशताब्दी एक्सप्रेस रेलयानाय न्यू बोंगाईगांव-गुवाहाटी पैसेंजर-रेलयानाय तिनसुकिया-नाहरलागुन एक्सप्रेस रेलयानाय च हरित-ध्वजं प्रदर्शितवान्। तत्रैव केन्द्रीय मन्त्री गुवाहाटी-नगरे तेतेलिया आरओबी इत्यस्य लोकार्पणम् अपि अकरोत्।

एतदतिरिच्य केन्द्रीय मन्त्री आकाशवाणी कोकराझार इत्यत्र 10 किलोवाट एफ.एम ट्रांसमीटर इत्यस्य उद्घाटनेन समम् नेशनल इंस्टीट्यूट ऑफ इलेक्ट्रॉनिक्स एंड इंफॉर्मेशन टेक्नोलॉजी इति मानित-विश्वविद्यालयस्य आभाषिकम् उद्घाटनं कृतवान् ।केन्द्रीय मन्त्री जगीरोड स्थितस्य टाटा सेमीकंडक्टर फैक्ट्री इति उद्योग-परिसरम् उपेत्य पूर्वोत्तर- सीमांत-रेल-विभागस्य अनुवर्त-मानानां परियोजनानाम् समीक्षाम् अपि अकरोत्।

**प्रधानमन्त्री-सावित्रीबाई फुले**

अद्य महान शिक्षाविदो: सवित्रीबाई फुले महोदयाया: जयन्ती वर्तते। प्रधानमंत्री नरेन्द्रमोदी तस्यै श्रद्धाञ्जलिं समर्पितवान्। एकस्मिन् सामाजिक-सञ्चार-पटले प्रधानमन्त्री अलिखत् यत् सावित्रीबाई फुले महिला-सशक्तिकरणे शिक्षायां सामाजिकोनयस्य च क्षेत्रे प्रेरणास्रोतरूपा मार्गदर्शिका च अवर्तत्।

**ऋतुसञ्चेतना**

देशस्य उत्तरभागे प्रबल-कुज्झटिका-कारणेन दृश्यतायां नैयून्येन नैकेषां विमानानां रेलयानानां च गमनागमनं प्रभावितम्। अस्माकं वार्ताहरेण सूचितं यत् राजधान्यं नव-दिल्ल्याम् इन्दिरा-गांधी अन्ताराष्ट्रिय-विमान-पत्तने स्वल्प-दृश्यता-कारणेन पञ्चाशत्

विमान-सेवासु विलम्बो जातः। अत्रान्तरे ऋतु-विज्ञान-विभागेन आगामि दिन-द्वयं दिनत्रयं च यावत् उत्तर-पूर्व-मध्य-भारते सघन कुज्झटिकायाः अनुमानं प्रकटितम्। सम्पूर्णे उत्तर-भारते शीतलहरी जम्मू-कश्मीरे च शीतप्रकोपः अनवरतं प्रवर्तते।

क्रिकेट्

भारत-ऑस्ट्रेलिया-दलयोः मध्ये अनुवर्तमानायाः क्रिकेट-शृङ्खलायाः पञ्चमान्तिम-स्पर्धायाम् अद्य प्रथमे दिने क्रीडावसानं यावत् ऑस्ट्रेलिया दलेन एकस्य क्रीडकस्य हानौ नव धावनाङ्काः अधिगताः। इतः पूर्वं भारतेन पणकं विजित्य प्रथम-पर्याये पञ्चाशीत्युत्तरैक-शतं धावनाङ्काः अधिगताः।

इति वार्ता।